श्री शिव पंचाक्षर नक्षत्रमाला स्तोत्रं

श्री शिव पंचाक्षर नक्षत्रमाला स्तोत्रं

श्रीमदात्मने गुणैकसिंधवे नमः शिवाय
धामलेशधूतकोकबंधवे नमः शिवाय |
नामशेषितानमद्भवांधवे नमः शिवाय
पामरेतरप्रधानबंधवे नमः शिवाय || 1 ||

कालभीतविप्रबालपाल ते नमः शिवाय
शूलभिन्नदुष्टदक्षफाल ते नमः शिवाय |
मूलकारणाय कालकाल ते नमः शिवाय
पालयाधुना दयालवाल ते नमः शिवाय || 2 ||

इष्टवस्तुमुख्यदानहेतवे नमः शिवाय
दुष्टदैत्यवंशधूमकेतवे नमः शिवाय |
सृष्टिरक्षणाय धर्मसेतवे नमः शिवाय
अष्टमूर्तये वृषेंद्रकेतवे नमः शिवाय || 3 ||

आपदद्रिभेदटंकहस्त ते नमः शिवाय
पापहारिदिव्यसिंधुमस्त ते नमः शिवाय |
पापदारिणे लसन्नमस्त ते नमः शिवाय
शापदोषखंडनप्रशस्त ते नमः शिवाय || 4 ||

व्योमकेश दिव्यभव्यरूप ते नमः शिवाय
हेममेदिनीधरेंद्रचाप ते नमः शिवाय |
नाममात्रदग्धसर्वपाप ते नमः शिवाय
कामनैकतानहृद्दुराप ते नमः शिवाय || 5 ||

ब्रह्ममस्तकावलीनिबद्ध ते नमः शिवाय
जिह्मगेंद्रकुंडलप्रसिद्ध ते नमः शिवाय |
ब्रह्मणे प्रणीतवेदपद्धते नमः शिवाय
जिह्मकालदेहदत्तपद्धते नमः शिवाय || 6 ||

कामनाशनाय शुद्धकर्मणे नमः शिवाय
सामगानजायमानशर्मणे नमः शिवाय |
हेमकांतिचाकचक्यवर्मणे नमः शिवाय
सामजासुरांगलब्धचर्मणे नमः शिवाय || 7 ||

जन्ममृत्युघोरदुःखहारिणे नमः शिवाय
चिन्मयैकरूपदेहधारिणे नमः शिवाय |
मन्मनोरथावपूर्तिकारिणे नमः शिवाय
सन्मनोगताय कामवैरिणे नमः शिवाय || 8 ||

यक्षराजबंधवे दयालवे नमः शिवाय
दक्षपाणिशोभिकांचनालवे नमः शिवाय |
पक्षिराजवाहहृच्छयालवे नमः शिवाय
अक्षिफालवेदपूततालवे नमः शिवाय || 9 ||

दक्षहस्तनिष्ठजातवेदसे नमः शिवाय
अक्षरात्मने नमद्बिडौजसे नमः शिवाय |
दीक्षितप्रकाशितात्मतेजसे नमः शिवाय
उक्षराजवाह ते सतां गते नमः शिवाय || 10 ||

राजताचलेंद्रसानुवासिने नमः शिवाय
राजमाननित्यमंदहासिने नमः शिवाय |
राजकोरकावतंसभासिने नमः शिवाय
राजराजमित्रताप्रकाशिने नमः शिवाय || 11 ||

दीनमानवालिकामधेनवे नमः शिवाय
सूनबाणदाहकृत्कृशानवे नमः शिवाय |
स्वानुरागभक्तरत्नसानवे नमः शिवाय
दानवांधकारचंडभानवे नमः शिवाय || 12 ||

सर्वमंगळाकुचाग्रशायिने नमः शिवाय
सर्वदेवतागणातिशायिने नमः शिवाय |
पूर्वदेवनाशसंविधायिने नमः शिवाय
सर्वमन्मनोजभंगदायिने नमः शिवाय || 13 ||

स्तोकभक्तितोऽपि भक्तपोषिणे नमः शिवाय
माकरंदसारवर्षिभाषिणे नमः शिवाय |
एकबिल्वदानतोऽपि तोषिणे नमः शिवाय
नैकजन्मपापजालशोषिणे नमः शिवाय || 14 ||

सर्वजीवरक्षणैकशीलिने नमः शिवाय
पार्वतीप्रियाय भक्तपालिने नमः शिवाय |
दुर्विदग्धदैत्यसैन्यदारिणे नमः शिवाय
शर्वरीशधारिणे कपालिने नमः शिवाय || 15 ||

पाहि मामुमामनोज्ञ देह ते नमः शिवाय
देहि मे वरं सिताद्रिगेह ते नमः शिवाय |
मोहितर्षिकामिनीसमूह ते नमः शिवाय
स्वेहितप्रसन्न कामदोह ते नमः शिवाय || 16 ||

मंगळप्रदाय गोतुरंग ते नमः शिवाय
गंगया तरंगितोत्तमांग ते नमः शिवाय |
संगरप्रवृत्तवैरिभंग ते नमः शिवाय
अंगजारये करेकुरंग ते नमः शिवाय || 17 ||

ईहितक्षणप्रदानहेतवे नमः शिवाय
आहिताग्निपालकोक्षकेतवे नमः शिवाय |
देहकांतिधूतरौप्यधातवे नमः शिवाय
गेहदुःखपुंजधूमकेतवे नमः शिवाय || 18 ||

त्र्यक्ष दीनसत्कृपाकटाक्ष ते नमः शिवाय
दक्षसप्ततंतुनाशदक्ष ते नमः शिवाय |
ऋक्षराजभानुपावकाक्ष ते नमः शिवाय
रक्ष मां प्रपन्नमात्ररक्ष ते नमः शिवाय || 19 ||

न्यंकुपाणये शिवंकराय ते नमः शिवाय
संकटाब्धितीर्णकिंकराय ते नमः शिवाय |
पंकभीषिताभयंकराय ते नमः शिवाय
पंकजासनाय शंकराय ते नमः शिवाय || 20 ||

कर्मपाशनाश नीलकंठ ते नमः शिवाय
शर्मदाय नर्यभस्मकंठ ते नमः शिवाय |
निर्ममर्षिसेवितोपकंठ ते नमः शिवाय
कुर्महे नतीर्नमद्विकुंठ ते नमः शिवाय || 21 ||

विष्टपाधिपाय नम्रविष्णवे नमः शिवाय
शिष्टविप्रहृद्द्रुहाचरिष्णवे नमः शिवाय |
इष्टवस्तुनित्यतुष्टजिष्णवे नमः शिवाय
कष्टनाशनाय लोकजिष्णवे नमः शिवाय || 22 ||

अप्रमेयदिव्यसुप्रभाव ते नमः शिवाय
सत्प्रपन्नरक्षणस्वभाव ते नमः शिवाय |
स्वप्रकाश निस्तुलानुभाव ते नमः शिवाय
विप्रडिंभदर्शितार्द्रभाव ते नमः शिवाय || 23 ||

सेवकाय मे मृड प्रसीद ते नमः शिवाय
भावलभ्यतावकप्रसाद ते नमः शिवाय |
पावकाक्ष देवपूज्यपाद ते नमः शिवाय
तवकांघ्रिभक्तदत्तमोद ते नमः शिवाय || 24 ||

भुक्तिमुक्तिदिव्यभोगदायिने नमः शिवाय
शक्तिकल्पितप्रपंचभागिने नमः शिवाय |
भक्तसंकटापहारयोगिने नमः शिवाय
युक्तसन्मनःसरोजयोगिने नमः शिवाय || 25 ||

अंतकांतकाय पापहारिणे नमः शिवाय
शंतमाय दंतिचर्मधारिणे नमः शिवाय |
संतताश्रितव्यथाविदारिणे नमः शिवाय
जंतुजातनित्यसौख्यकारिणे नमः शिवाय || 26 ||

शूलिने नमो नमः कपालिने नमः शिवाय
पालिने विरिंचिमुंडमालिने नमः शिवाय |
लीलिने विशेषरुंडमालिने नमः शिवाय
शीलिने नमः प्रपुण्यशालिने नमः शिवाय || 27 ||

शिवपंचाक्षरमुद्रां चतुष्पदोल्लासपद्यमणि घटितां |
नक्षत्रमालिकामिह दधदुपकंठं नरो भवेत्सोमः || 28 ||

इति श्रीमच्छंकराचार्य कृतं श्री शिव पंचाक्षरनक्षत्रमाला स्तोत्रं ||